चञ्चला अपि न महान्तः के चञ्चलभाव-
मानीताः ॥” )

मिष्टम् । इत्युणादिकोषः ॥

रुचिरा, स्त्री, ( रोचते इति । रुच्+किरच् । ततष्टाप् । ) गोरोचना । इति राजनिर्घण्टः ॥ (त्रयोदशाक्षरवृत्तिविशेषः । अस्य लक्षणोदाहरणादिकं छन्दःशब्दे द्रष्टव्यम् ॥ )

रुचिराञ्जनः, पुं, ( रुचिरः सुन्दरोऽञ्जनः । ) शोभाञ्जनः । इति राजनिर्घण्टः ॥

रुचिराश्वः, पुं, ( रुचिरः सुन्दरोऽश्वो यस्य । ) राजविशेषः । स तु देवापेः श्वशुरः । यथा,—

“मरो भूपाललोकानां स्वस्तये कुरु मे वचः ।
रुचिराश्वसुतां शान्तां देवापे त्वं समुद्वह ॥”

इति कल्किपुराणे १८ अध्यायः ॥

सुन्दरघोटकश्च ॥

रुचिष्यं, त्रि, ( रुच्यते इति । रुच्+“रुचिभुजिभ्यां किष्यन् ।” उणा० ४ । १७८ । इति किष्यन् ।) मिष्टवस्तु । इत्युणादिकोषः ॥ ( यथा, सुश्रुते । १ । ४६ । पुष्पवर्गे ।

“शिखाकी वातला सान्द्रा रुचिष्यानल-
दीपनी ॥” )

अभिप्रेतम् । इति संक्षिप्तसारोणादिवृत्तिः ॥ ( यथा, हरिवंशे । २५४ । ६० ।

“न पृथ्वीं कामये हर्तुं त्वां सन्तुष्टोऽस्मि पदै-
स्त्रिभिः ।
एष एव रुचिष्यो मे वरो दानवसत्तम ! ॥” )

रुची, स्त्री, ( रुचि+कृदिकारादिति ङीष् । ) रुचिः । यथा । रुक् रुची रुचयः समाः । इत्येकार्थसंग्रहः ॥

रुच्यं, क्ली, ( रोचते इति । रुच्+“राजसूयसूर्य्यमृषोद्येति ।” ३ । १ । ११४ । इति क्यप्प्रत्ययेन निपातितम् ।) सौवर्च्चलम् । इति राजनिर्घण्टः ॥

रुच्यः, पुं, ( रुच्+क्यप् । ) कतकवृक्षः । शालिधान्यम् । इति राजनिघण्टः ॥ पतिः । इति हेमचन्द्रः । ३।१८१ ॥ सुन्दरे, त्रि । इत्यमरः ॥ ( रुचिकरः । यथा,—

“पक्वं वर्णकरं रुच्यं मांसशुक्रबलप्रदम् ।
पित्तावरोधि वातघ्नं हृद्यं गुर्व्वनुलोमनम् ॥”

इति वैद्यकराजवल्लभे द्रव्यगुणाख्यायाम् ॥ )

रुच्यकन्दः, पुं, ( रुच्यः कन्दो यस्य । ) सूरणः । इति राजनिर्घण्टः ॥

रुज, ओ श औ भङ्गे । इति कविकल्पद्रुमः ॥ ( तुदा०-पर० सक०-अनिट् । ) ओ, रुग्नः । श, रुजति रोगो हस्तम् । औ, रोक्ता । इति दुर्गादासः ॥

रुज, क हिंसे । इति कविकल्पद्रुमः ॥ ( चुरा०-पर०-सक० सेट् । ) क, रोजयति । इति दुर्गादासः ॥

रुजा, स्त्री, ( रुज्+क्विप् । पक्षे टाप् । ) रोगः । भङ्गः । इति मेदिनी । जे, १४ ॥ ( पीड़ा । यथा, महाभारते । ८ । ३४ । १४६ ।

“निपातात् तव शस्त्राणां शरीरे याभवद्रुजा ।
तया ते मानुषं कर्म्म व्यपोढं भृगुनन्दन ! ॥”)

मेषी । इति हेमचन्द्रः । ४ । ३४३ ॥ कुष्ठम् । इति राजनिर्घण्टः ॥

रुजाकरं, क्ली, ( रुजां रोगं करोतीति । कृ+टः । ) कर्म्मरङ्गफलम् । इति शब्दचन्द्रिका ॥

रुजाकरः, पुं, ( रुजां करोतीति । कृ+टः । ) व्याधिः । यथा । व्याधिस्त्वाधी रुजाकरः । इति हेमचन्द्रः । २ । २२६ ॥ ( व्याधिकारके, त्रि ॥ )

रुजासहः, पुं, (रुजां सहते इति । सह+अच् ।) धन्वनवृक्षः । इति राजनिर्घण्टः ॥

रुट, इ स्तेये । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् । ) पञ्चमस्वरी । इ, रुण्टते धनं चौरेण । इति दुर्गादासः ॥

रुट, ऋ ङ दीप्तिप्रतिहत्योः । इति कविकल्पद्रुमः ॥ ( भ्वा०-आत्म०-सक०-अक० च-सेट् । ) ऋ, अरुरटत् । ङ, रोटते । प्रतिहतिः शोकादिना पातनं पुनर्हननं वा । इति दुर्गादासः ॥

रुट, क रुषि । द्युतौ । इति कविकल्पद्रुमः ॥ ( चुरा०-पर०-अक०-सेट् । ) क, रोटयति ॥ इति दुर्गादासः ॥

रुट् [ ष् ] स्त्री, ( रुष्+क्विप् । ) क्रोधः । इत्यमरः ।१।७।२६ ॥ (यथा, भागवते । १।१८।३० ।

“स तु ब्रह्म ऋषेरंशे गतासुमुरगं रुषा ।
विनिर्गच्छन् धनुष्कोट्या निधाय पुरमागतः ॥”)

रुठ, उपघाते । इति कविकल्पद्रुमः ॥ ( भ्वा०-पर०-सक०-सेट् । ) रोठति लोकं शोकः । इति दुर्गादासः ॥

रुठ, इ गत्यालस्यस्तेयखोटे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-अक०च-सेट् ।) पञ्चमस्वरी । इ, रुण्ठते । आलस्यं मन्दीभावः । स्तेयं चौर्य्यम् । खोटः खोड़नम् । इति दुर्गादासः ॥

रुठ, ऋ ङ प्रतीघाते । इति कविकल्पद्रुमः ॥ ( भ्वा०-आत्म०-सक०-सेट् । ) ऋ, अरुरठत् । ङ, रोठते । प्रतीघातः शोकादिना पतनं पुनर्हननं वा । इति दुर्गादासः ॥

रुड्, [ ष् ] स्त्री, ( रुष क्रुधि+क्विप् । ) रुट् । इति व्याकरणम् ॥

रुणस्करा, स्त्री, सुखसन्दोह्या गौः । इति शब्दचन्द्रिका ॥

रुण्डः, पुं, कबन्धः । इति जटाधरः ॥ ( छिन्नपादहस्तः । यथा, कथासरित्सागरे । ६५ । ११ ।

“तेनारोप्य स्थलं पृष्ठः स रुण्डः पुरुषोऽभ्यधात् ।
निकृत्तहस्तचरणो नद्यां क्षिप्तोऽस्मि शत्रुभिः ॥”)

रुण्डिका, स्त्री, ( रुण्डः कबन्धोऽस्यत्रेति । रुण्ड+ठन् । ) युद्धभूमिः । द्वारपिण्डिका । विभूतिः । इति शब्दरत्नावली ॥

रुतं, क्ली, ( रु+क्तः । ) पशुपक्ष्यादीनां शब्दः । तत्पर्य्यायः । वाशितम् २ । इत्यमरः ॥ वासितम् ३ । इति शब्दरत्नावली ॥ ( यथा, शिशुपालवधे । १६ । २५ ।

“अनुहुंकुरुते घनध्वनिं
न तु गोमायुरुतानि केशरी ॥”)

रुद, ल घ इर् रोदे । इति कविकल्पद्रुमः ॥ ( अदा०-पर०-अक०-सेट् । ) रोदोऽश्रुविमोचनम् । ल घ, रोदिति लोकः शोकात् । इर्, अरुदत् अरोदीत् । रोदिष्यमाणमात्मानमिति भट्टी । आशानविशिष्टरोदनक्रियाव्याप्यत्वात् सकर्म्मकत्वमिति जयमङ्गला । इति दुर्गादासः ॥

रुदथः, पुं, ( रोदितीति । रुद् रोदने+“रुदिविदिभ्यां ङित् ।” उणा० ३ । ११६ । इति अथः । स च ङित् ।) कुक्कुरः । इत्युणादिकोषः ॥ शिशुः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

रुदन्तिका, } स्त्री, ( रोदनं रुत् । अति अदि
रुदन्ती } बन्धने+अच्+ङीप् । स्वार्थे कन् च ।) क्षुद्रक्षुपविशेषः । तत्पर्य्यायः । स्रवत्तोया २ सञ्जीवनी ३ अमृतस्रवा ४ रोमाञ्चिका ५ महामांसी ६ चणपत्री ७ सुधास्रवा ८ । अस्या गुणाः । कटुत्वम् । तिक्तत्वम् । उष्णत्वम् । कषायत्वम् । श्वासरक्तपित्तकफश्वासमेहवातिशत्वञ्च । रसायनत्वञ्च । अस्य स्वरूपं यथा,—

“चणपत्रसमं पत्रं क्षुपश्चैव तथाकृतिः ।
शिशिरे जलबिन्दूनां स्रवन्तीति रुदन्तिका ॥”

इति राजनिर्घण्टः ॥

अस्य गुणाः ।

“रुदन्ती वह्निकृद्दृष्या पित्तघ्नी च रसायनी ।”

इति राजवल्लभः ॥

( रोदनशीले, त्रि । यथा,—

“धरित्रि पुष्पाञ्जलिरेष तुभ्यं
सुता मदीयास्तव पालनीयाः ।
इतीव रम्भा नमिताग्रमौलिना
भृशं रुदन्ती मकरन्दबिन्दुना ॥”

इति प्रसिद्धम् ॥ )

रुदितं, क्ली, ( रुद्+क्तः । ) क्रन्दनम् । इत्यमरः ॥ तद्वति, त्रि ॥ ( यथा, महाभारते । १३।२३।६ ।

“केशकीटावपतितं क्षुतं श्वभिरवेक्षितम् ।
रुदितञ्चावधूतञ्च तं भागं रक्षसां विदुः ॥” )

रुद्धं, त्रि, ( रुध्+क्तः । ) नदीप्राकारादिना कृतवेष्टनम् । तत्पर्य्यायः । वेष्टितम् २ वलयितम् ३ संवीतम् ४ आवृतम् ५ । इत्यमरः ॥ ( यथा, मेघदूते । ३८ ।

“रुद्धालोके नरपतिपथे सूचिभेद्यैस्तमोभिः ॥”)

रुद्रः, पुं, ( रोदयतीति । रुद्+णिच्+“रोदेर्णिलुक् च ।” उणा० २ । २२ । इति रक् । णेश्च लुक् ।) आदित्यपत्रवृक्षः । इति राजनिर्घण्टः ॥ शिवः । ( यथा, महाभारते । १३ । १७ ।४६ ।

“त्रिजटश्चीरवासाश्च रुद्रः सेनापतिर्व्विभुः ॥”)

गणदेवताविशेषः । इत्यमरः ॥ अयं अग्निमूर्त्तिः । यथा रुद्राय अग्निमूर्त्तये नमः । इति तिथ्यादितत्त्वे शिवपूजापद्धतिः ॥ स च ब्रह्मणः क्रोधरूपः सृष्टिकाले भ्रूमध्याज्जातः । तद्रूपः भूतप्रेतपिशाचादिः । अयमेवान्ते संहारकर्त्ता । इति भागवतम् ॥ * ॥ अथैकादशरुद्रनामानि यथा । अजः १ एकपात् २ अहिब्रध्नः ३ पिनाकी ४ अपराजितः ५ त्र्यम्बकः ६